संस्कृत-वार्ता:

29.04.2024

सायम् - 06:20

मुख्यवार्ता:

- लोकसभा निर्वाचनस्य तृतीयचरणाय प्रचाराभियानानि सजवं प्रवर्तन्ते ।
- उत्तराखण्डे वन-अग्नि-निवारणार्थं प्रयत्नाः प्रचलन्ति; वनाग्निकाण्डे संलिप्ताः अष्टौ जनाः निगडिताः
- छत्तीसगढस्य बेमेतारामण्डले राजमार्गदुर्घटनायाम् अष्टौ जनाः मृताः।
- जम्मू-कश्मीर-उधमपुर-मण्डले आतङ्कवादीनां समूहद्वयस्य अन्वेषणं निष्प्रभावीकरणं च कर्तुं अन्वेषणकार्यक्रमः प्रवर्तते ।
- गतसायं प्रारभ्य अविरामवृष्टेः कारणात् काश्मीरस्य नैकभागेषु विनाशः सञ्जायते।
- आईपीएल क्रिकेट् क्रीडाप्रतियोगितायां कोलकातायाम् अद्य कोलकाता- राइडर्स् दलं दिल्ली कैपिटल्स् दलं विरुद्ध्य क्रीडिष्यति

प्रचाराभियानानि

निर्वाचनदिवसानां सान्निकट्यम् अनुभवन्त: विभिन्नदलानां वरिष्ठनेतार: एकस्यपि निर्वाचनक्षेत्रस्य अस्पृष्टभागं त्यक्तुं नेच्छन्त: सजवं प्रचाराभियाने संलग्ना: अभवन्। भाजपेतिदलस्य वरिष्ठनेता देशस्य प्रधानमन्त्री च श्रीनरेन्द्रमोदी प्रचाराभियाने उक्तवान् यत् देशं सप्तचत्वारिंशदुत्तरद्विसहस्रतमवर्षं यावत् विकसितं कर्तुं अहर्निशं किं करणीयमिति अस्मद्योजना निर्धारितास्ति। स: बेंगलुरूनगरे प्रचाररत: आसीत्। तेन कांग्रेसदलस्य आलोचनां कुर्वन् प्रोक्तं यत् काग्रेसदलम् तुष्टीकरणस्य राजनीतिं करोति। कांग्रेसदलं बेंगलुरूनगरं सूचनाप्रौद्योगिकी-केन्द्रत: जलवाहन-केन्द्र-रूपेण परिवर्तितुमिच्छति। यतो हि अत्र पेयजलस्य समस्या वरीवर्धते। श्रीमोदी जनान् आहूतवान् यत् ते सामाजिकप्रसारतन्त्रस्य सूचनासु विनैव बुद्धिप्रयोगेन विश्वासं मा कुर्युरिति। कांग्रेसदलनेत्र्या प्रियंकागांधीवाड्रा इत्यनयापि दलस्य गुलबर्गाक्षेत्रस्य प्रत्याशिन: पक्षे प्रचारार्थं सेदाम इत्यत्र जनसभा सम्बोधिता।

उत्तराखण्ड-वनाग्निः

उत्तराखण्डे वनाग्निं शामयितुम् एनडीआरएफ-कर्मचारिभिः सह वन-विभागस्य प्रयत्नाः प्रचलन्ति, येन गढ़वाल-कुमाऊन्-विभागयोः अग्नि-प्रकोपस्य नियन्त्रणे महती प्रगतिः सञ्जाता अस्ति। अग्निशामकप्रयासेषु स्थानीयसमुदायाः अपि स्वसमर्थनं ददति। नैनीतालमण्डलस्य महेशखानक्षेत्रे एव अग्निघटनानां नियन्त्रणार्थं त्रिंशत् एनडीआरएफ-कर्मचारिभिः सहिताः त्रिशतम् अग्निनिरीक्षकाः नियोजिताः सन्ति। मुख्यमन्त्री पुष्करसिंहधामी इत्यनेन आश्वासनं दत्तं यत् वनानां अग्निप्रकोपानां वर्धमानघटनानां निवारणाय सर्वे सम्भाव्यपरिहाराः क्रियन्ते। इतरथा केन्द्रीयमन्त्री अजयभट्टः नैनीतालमण्डलस्य प्रभावितक्षेत्रेषु स्थितेः मूल्याङ्कनं कुर्वन् अस्ति। अपरपक्षे, अधिकारिभिः वन-अग्निघटनासु सम्बद्धानाम् अष्टानां जनानां निगडनं कृत्वा शीघ्रं कार्यवाही कृता, तान् विरुध्य भारतीयवनविधेः आईएफए-सम्बद्धानां धाराणाम् अन्तर्गतं कार्यवाही क्रियते ।

छत्तीसगढ़-राजमार्गदुर्घटना

छत्तीसगढे बेमेतारामण्डले राजमार्गदुर्घटनायाम् अष्टजनाः मृताः, एकविंशतिः जनाः च व्रणिताः सञ्जाताः। आरक्ष्यधिकारिणां मते प्रायः त्रिंशत् जनाः पारिवारिककार्यक्रमे भागं गृहीत्वा वाहनेन स्वग्रामं प्रत्यागच्छन्ति स्म । तेषां यानं कठियाग्रामस्य समीपे अन्येन वाहनेन सह दुर्घटनाग्रस्तं जातम्। घटनायां अष्टजनाः स्थले एव मृताः। मृतेषु पञ्च महिलाः त्रयः बालकाः च सन्ति। गभीररूपेण व्रणिताः चत्वारः जनाः एम्स रायपुरं प्रति प्रेषिताः सन्ति। अन्य-व्रणितानां बेमेतारा जनपदचिकित्सालये चिकित्सा क्रियते।

जम्मू-कश्मीर-आतङ्कवादिनः

जम्मू-कश्मीरस्य, उधमपुरमण्डलस्य बसन्तगढस्य सघनवनेषु आतङ्कवादिनां समूहद्वयस्य निष्प्रभावीकरणाय अन्वेषणार्थं च विशालः अन्वेषण-कार्यक्रमः अद्य द्वितीयदिने प्रवेशं कृतवान्। आकाशवाणीजम्मूसंवाददाता उक्तवान् यत् रविवासरे प्रातःकाले चोचरुगाला-उच्चस्थानेषु दूरस्थे पनाराग्रामे आतङ्कवादिभिः सह संक्षिप्तसङ्घर्षे ग्रामस्य रक्षारक्षकस्य (वीडीजी) मृत्युः अभवत्, तदनन्तरं आरक्षिभिः, सेनया, सीआरपीएफ-द्वारा च मृगया आरब्धा। अन्वेषणकार्यक्रमः प्रचलति, पलायितैः आतङ्कवादिभिः सह नूतनः सम्पर्कः नास्ति। अद्य प्रातःकाले आतङ्कवादिनः अन्वेष्टुं निष्प्रभावीकर्तुं च प्रयत्नाः तीव्रताम् अवाप्नुवन्।जम्मूक्षेत्रस्य एडीजी-आनन्दजैनः अवदत् यत् अद्यैव सीमापारात् आतङ्कवादिनां द्वौ समूहौ क्षेत्रे उपस्थितौ इति विश्वस्यते।

## कश्मीर- वातावरणम्

काश्मीरे रविवासरस्य सायंकालात् आरभ्य अविरामवृष्टेः कारणात् अनेकभागेषु विनाशः अभवत्। श्रीनगरादिषु काश्मीरस्य अन्येषु भागेषु विगत-चतुर्विंशतिहोराभिः मध्यमतः अधिकवृष्टिः अभवत् । अनेकमार्गेषु, निम्नक्षेत्रेषु च जलप्रलयः सामान्यजीवनं बाधितवान् इति ज्ञातम्। गुलमार्ग्, गुरेज-उपत्यका, रजदान-टॉप्, साधना-टॉप्, मुगल-मार्गः, ज़ोजिला-दर्रा चेत्यादिषु केषुचित् उपरितन-स्थानेषु अल्पहिमपातः अपि अभवत्। अविरामवृष्ट्या जम्मू-श्रीनगरराजमार्गः मुगलमार्गः च बाधितः सञ्जातः। नल्लाहेषु, उपत्यकायाः पारं धारासु च जलस्तरः प्रचण्डवृष्ट्या बहुधा वर्धितः। परन्तु एतावता जलप्लावनस्य सङ्कटं नास्ति इति अधिकारिणः अवदन्। इतरथा जम्मू-कश्मीर-आपदा-प्रबन्धन-प्राधिकरणेन निर्गतस्य अशुभ-वातावरणस्य, हिमस्खलनस्य च आह्वानम् अवलोक्य अद्य कुपवाड़ा-मण्डले सर्वेषु विद्यालयेषु कक्षाः प्राधिकारिभिः स्थगिताः।

## जम्मू-कश्मीर-सचिवालय :

जम्मू-कश्मीरे नागरिकसचिवालये प्रभावि-कुशल-कार्यसंचालनहेतुः नागरिकसचिवालयः प्रथमदिनाङ्कतः जम्मू-श्रीनगरयोः द्वयोः अपि कार्यरतः भविष्यति। आकाशवाणी जम्मू संवाददात्रा उक्तं यत् प्रशासनिकसचिवेभ्यः निर्देशः दत्तः यत् ते नागरिकसचिवालये, श्रीनगरे प्रथमदिनाङ्कात् प्रभावीरूपेण स्वोपलब्धतां सुनिश्चितां कुर्वन्तु तथा च कार्यात्मकावश्यकतानुसारं नागरिकसचिवालये, जम्मू इत्यत्र अपि उपस्थिताः भवेयुः। प्रशासनिकसचिवेभ्यः उक्तं यत् ते उभयत्र कार्यालयानां सुचारुरूपेण कार्यानुष्ठानस्य व्यवस्थां सुनिश्चितां कुर्वन्तु इति।

## विदेशमन्त्री जयशंकरः

विदेशमन्त्री डॉ. एस जयशंकरः अद्य उक्तवान् यत् भारतस्य विशालक्षमता अद्यापि सम्पूर्णं विश्वं प्रति अज्ञातभूता अस्ति। दिल्लीविश्वविद्यालयस्य महाविद्यालये दक्षिणपूर्व एशिया-जापानयोः सह पूर्वोत्तरभारतस्य एकीकरणस्य विषये अन्तःक्रियाशीलसत्रं सम्बोधयन् डा. जयशङ्करः उल्लेखितवान् यत् देशेन एकीकृतविकासाय जी-20-सङ्घस्य आयोजनं कृतम्। सः अवदत् यत् विश्वस्य कूटनैतिकं अवधानं प्राप्तुं सर्वकारेण एतत् सर्वाधिकं कार्यं कृतम् अस्ति।

डॉ जयशंकरः अग्रे अपि अवदत् यत् कूटनैतिकं अवधानं केवलं केषुचित् महानगरेषु एव न भवेत् अपितु प्रत्येकं राज्ये एव भवितुमर्हति। सः एतदपि प्रकाशितवान् यत् देशे एकविंशतिः एतादृशानि जलविमानानि सेवायां सन्ति यानि अन्ताराष्ट्रियजलव्यापारस्य रक्षणं कुर्वन्ति। तेनोक्तम् अनेन व्यापारव्ययः न्यूनः भवति।

## गुजरात-प्रचाराभियानम्

काङ्ग्रेसदलस्य वरिष्ठनेता राहुलगान्धी भाजपासर्वकारस्य आलोचनां कुर्वन् उक्तवान् यत् देशे सर्वत्र महर्घता, अवृत्तिः च निरन्तरं वर्धते । अद्य उत्तरगुजरातस्य पाटननगरे निर्वाचनसभां सम्बोधयन् श्रीगान्धी उक्तवान् यत् एनडीए-सर्वकारेण पर्याप्तमात्रायां व्यावसायिकऋणेषु च्युततां प्रदाय कृषकैः, आदिवासिभिः, लघुश्रमिकैः सह अन्यायः कृतः अस्ति। सः अवदत् यत् देशे एकप्रतिशतमितं जनाः एव चत्वारिंशत् प्रतिशतं धनं नियन्त्रयन्ति। श्रीगान्धी अवदत् यत् काङ्ग्रेसदलं सत्तां प्राप्य देशे प्रत्येकं समुदायस्य प्रतिनिधित्वस्य आकलनाय जाति-आधारितां जनगणनां करिष्यति तथा च कृषकाणां ऋणम् अऋणं करिष्यति। अपरपक्षे गुजरातभाजपा-अध्यक्षः सीआर पाटिलः दलस्य प्रतिनिधीनाम् पक्षे प्रचारं कुर्वन् अस्ति।

## काङ्ग्रेस प्रत्याशिसूची

काङ्ग्रेसदलेन अद्य लोकसभानिर्वाचनानां कृते चतुर्णां प्रत्याशिनां नामानि समुद्घोषितानि। पंजाब-काँग्रेस-अध्यक्षः अमरिन्दरसिंह ब्रारः लुधियाना-लोकसभाक्षेत्रतः निर्वाचनेषु प्रतिभागितां करिष्यति, दलनेता सुखजिन्दरसिंहः रन्धावा गुरदासपुरतः प्रातिभाग्यं भजिष्यति। आनंदपुर-साहब-लोकसभाक्षेत्रतः पंजाबस्य पूर्वमंत्री विजय -इन्दर- सिंगला प्रतिभागितां करिष्यति ।

## केन्द्र- इन्फ्लूएन्जा-एः

केन्द्रं रैत्विकइन्फ्लूएन्जा इति सङ्क्रमणं सूक्ष्मदृष्ट्या निरीक्षते। अमेरिकादेशस्य विभिन्नेषु राज्येषु पशुषु दुग्धेषु च एवियन इन्फ्लूएन्जाविषाणोः पत्ताङ्गीकरणस्य विषये प्रतिवेदन-कारणात् देशस्य वर्तमानस्थितेः आकलनाय केन्द्रीयस्वास्थ्यमन्त्रालयेन राज्यैः, केंद्रशासनिकसंस्थाभिः च सह समीक्षासभा आयोजिता। परन्तु अधुना देशस्य कस्मिन् अपि भागे ऋतुकाले फ्लू-रोगस्य असामान्यः आतङ्कजनकः वृद्धिः न दृश्यते । ऋतुकाले इन्फ्लूएन्जा -विषाणुभिः उत्पद्यमानं तीव्र- श्वसनसंक्रमणं यद्धि विश्वस्य सर्वेषु भागेषु प्रचलति, वैश्विकरूपेण च कतिपयेषु मासेषु प्रकरणानाम् वृद्धिः दृश्यते ऋतुकाले इन्फ्लूएन्जा-रोगस्य सन्दर्भे सहरोगयुक्ताः लघुबालकाः वृद्धाः च समूहाः सर्वाधिकतया ग्रसिताः भवितुं शक्नुवन्ति । विशेषज्ञाः वदन्ति यत् दुग्धस्य उष्णता, पर्याप्ततापमानस्य मांसस्य सम्यक् पाकः इत्यादीनां समुचितस्वच्छताप्रथानाम् उपयोगेन उत्पादात् मानवं प्रति विषाणोः संक्रमणं निवारयितुं शक्यते।

<u>आईपीएल क्रिकेट</u>

आईपीएल क्रिकेट्-क्रीडायां कोलकातायाः ईडेन्-गार्डन्स्-क्रीडाङ्गणे अद्य कोलकाता-नाइट्-राइडर्स्-दलं दिल्ली-कैपिटल्स्-दलं विरुध्य क्रीडिष्यति। गतरात्रौ चेन्नई-नगरस्य एम.ए.चिदम्बरम-क्रीडाङ्गणे चेन्नै-सुपर-किङ्ग्स्-दलेन सनराइजर्-हैदराबाद-दलं अष्टसप्ततिः धावनाङ्कैः पराजितम् ।

।। इति वार्ता: ।।